# || શ્રી નૃસિંહકૃપાવલોકનપ્રાર્થનાસ્તુતિઃ ||

શ્રી કૃષ્ણ ઉવાચ -

સુલભો ભક્તિયુક્તાનાં દુર્દર્શો દુષ્ટચેતસામ |
અનન્યગતિકાનાં ચ પ્રભુઃ ભક્તૈકવત્સલઃ || ૧ ||

શનૈશ્ચરસ્તત્ર નૃસિંહદેવસ્તુતિં ચકારામલચિત્તવૃત્તિઃ |
પ્રણમ્ય સાષ્ટાંગમશેષલોકકિરીટનીરાજિતપાદપદ્મમ || ૨ ||

શનિરુવાચ -

યત્પાદપંકજરજઃ પરમાદરેણ
સંસેવિતં સકલકલ્મષરાશિનાશમ |
કલ્યાણકારણમશેષનિજાનુગાનાં
સ ત્વં નૃસિંહ મયિ ધેહિ કૃપાવલોકમ || 3 ||

સર્વત્ર ચંચલતયા સ્થિતયા ચ લક્ષ્મ્યા
બ્રહ્માદિવંદ્યપદયા સ્થિરયા ન્યસેવિ |
પાદારવિંદયુગલમ પરમાદરેણ
સ ત્વં નૃસિંહ મયિ ધેહિ કૃપાવલોકમ || ૪ ||

|| શ્રી નૃસિંહકૃપાવલોકનપ્રાર્થનાસ્તુતિઃ ||

યદ્રૂપમાગમશિરઃપ્રતિપાદ્યમાદ્ય-
માધ્યાત્મિકાદિપરિતાપહરં વિચિંત્યમ |
યોગીશ્વરૈરપગતાખિલદોષસંઘૈઃ
સ ત્વં નૃસિંહ મયિ ધેહિ કૃપાવલોકમ || ૫ ||

પ્રહ્લાદભક્તવચસા હરિરાવિરાસીઃ
સ્તંભે હિરણ્યકશિપું ય ઉદારભાવઃ |
ઊર્વોર્નિધાય તદુરે નખરૈર્દદાર
સ ત્વં નૃસિંહ મયિ ધેહિ કૃપાવલોકમ || ૬ ||

યો નૈજભક્તમનલાંબુધિભૂધરોગ્ર-
શૃંગપ્રપાતવિષદંતિસરીસૃપેભ્યઃ |
સર્વાત્મકઃ પરમકારુણિકો રરક્ષ
સ ત્વં નૃસિંહ મયિ ધેહિ કૃપાવલોકમ || ૭ ||

યન્નિર્વિકારપરરૂપવિચિંતનેન
યોગીશ્વરા વિષયવીતસમસ્તરાગાઃ |
વિશ્રાંતિમાપુરવિનાશવતીં પરાખ્યાં
સ ત્વં નૃસિંહ મયિ ધેહિ કૃપાવલોકમ || ૮ ||

|| શ્રી નૃસિંહકૃપાવલોકનપ્રાર્થનાસ્તુતિઃ ||

યદ્રૂપમુગ્રમરિમર્દનભાવશાલિ-
સંચિંતનેન સકલાહવભીતિહારિ |
ભૂતજ્વરગ્રહસમુદ્ભવભીતિનાશં
સ ત્વં નૃસિંહ મયિ ધેહિ કૃપાવલોકમ || ૯ ||

યસ્યોત્તમં યશ ઉમાપતિપદ્મજન્મ-
શક્રાદિદૈવતસભાસુ સમસ્તગીતમ |
શ્રુત્યૈવ સર્વશમલપ્રશમૈકદક્ષં
સ ત્વં નૃસિંહ મયિ ધેહિ કૃપાવલોકમ || ૧૦ ||

શ્રી કૃષ્ણ ઉવાચ -

એવં શ્રુત્વા સ્તુતિં દેવઃ શનિના કલ્પિતાં હરિઃ |
ઉવાચ બ્રહ્મવૃંદસ્થં શનિં સદ્ભક્તવત્સલઃ || ૧૧ ||

શ્રી નૃસિંહ ઉવાચ -

પ્રસન્નોહં શને તુભ્યં વરં વરય શોભનમ |
યં વાંછસિ તમેવ ત્વં સર્વલોકહિતાવહમ || ૧૨ ||

|| શ્રી નૃસિંહકૃપાવલોકનપ્રાર્થનાસ્તુતિઃ ||

શ્રી શનૈશ્ચર ઉવાચ -

નૃસિંહ ત્વં મયિ કૃપાં કુરુ દેવ દયાનિધે |
મદ્વાસરસ્તવપ્રીતિકરઃ સ્યાદ્દેવતાપતે || ૧૩ ||

મત્કૃતં ત્વત્સ્તવં યે વૈ શૃણ્વંતિ ચ પઠંતિ ચ |
સર્વાન કામાન પૂરયેથાસ્તેષાં ત્વં લોકભાવન || ૧૪ ||

શઇ નૃસિંહ ઉવાચ -

તથૈવાસ્તુ શનેઽહં વૈ રક્ષોભુવનમાસ્થિતઃ |
ભક્તકામાન પૂરયિષ્યે ત્વં મમૈકં વચઃ શૃણુઃ || ૧૫ ||

ત્વત્કૃતં મત્પરં સ્તોત્રં યઃ પઠેચ્ચ શૃણોતિ યઃ |
દ્વાદશાષ્ટમજન્મસ્થં તદ્ભયં માસ્તુ તસ્ય વૈ || ૧૬ ||

શનિર્નરહરિં દેવં તથેતિ પ્રત્યુવાચ હ |
તતઃ પરમસંતુષ્ટાઃ જયેતિ મુનયોઽવદન || ૧૭ ||

શઈ નૃસિંહ ઉવાચ -

|| શ્રી નૃસિંહકૃપાવલોકનપ્રાર્થનાસ્તુતિઃ ||

ઇત્થં શનૈશ્ચરસ્યાથ નૃસિંહદેવસંવાદમેતત સ્તવનં ચ માનવઃ |
શ્રુણોતિ યઃ શ્રાવયતે ચ ભક્ત્યા સર્વાન્યભીષ્ટાનિ ચ વિંદતે ધ્રુવમ || ૧૮ ||

|| ઇતિ ભવિષ્યોત્તરપુરાણે રક્ષોભુવનપ્રસ્તાવે શનૈશ્ચરકૃતા શ્રી નૃસિંહકૃપાવલોકનપ્રાર્થનાસ્તુતિઃ ||